उपदेशपदार्थविमर्शः

सुबोधशर्मा

उपदेशशब्दः नानार्थकः। व्याकरणे उपदेश आद्योच्चारण-मिति पक्षोऽपि। परन्तु क्वचित् करणघञन्तः उपदेशशब्दः, क्वचित् भावघञन्तश्च स्वीक्रियते। यद्यपि सामान्येन भावघञन्तं पक्षं प्रौढमनोरमोक्तमेव विद्वांसः आश्रयन्ति, तथापि इत्संज्ञाविधौ करणघञन्तः एव स्वीकरणीयः इति सिद्धान्तः कश्चन पक्षः प्रबन्धा भाष्यादिपर्यालोचनेन प्रस्तूयते।

उपदेशशब्दस्य विभिन्नेष्वर्थेषु प्रयोगो दृश्यते। तथाहि–'उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये,[१] 'उपदेशो न दातव्यो यादृशे तादृशे जने'[२] इत्यत्र हितकथनार्थे वर्तते। 'चन्द्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये। मन्त्रमात्रप्रकथनम् उपदेशः स उच्यते।।[३] इत्यत्र मन्त्रकथनार्थे दीक्षार्थे वा भवति। शिक्षणार्थेऽपि उपदेशशब्दो भवति। यथा–'धर्मोपदेशं दर्पण विप्राणामस्य कुर्वतः'[४] इत्यत्र शिक्षणार्थे। 'स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्या'[५] इत्यत्राध्ययनार्थे उपदेशशब्दः। एवं नानाऽर्थेषूपदेशशब्दो लभ्यते। व्याकरणशास्त्रे भगवान् पाणिनिरपि उपदेशशब्दमनेकशः प्रयुनक्ति। तथाहि– उपदेशेऽजनुनासिक इत्'[६] 'उपदेशेऽत्वतः'[७] 'आदेच उपदेशेऽशिति'[८] एकाच उपदेशऽनुदात्तात्[९] इत्यादौ। तत्र न ज्ञायते उपदेशपदार्थः कः? नहि पाणिनिना कुत्रचित् उपदेशशब्दार्थः कथितः। अतः व्याकरणशास्त्रे उपदेशपदार्थविचाराय प्रकृतोऽयं प्रबन्धः।

उपोपसर्गात् दिश्धातोः घञि प्रत्यये, 'पुगन्तलघूपधस्य च'[१०] इति गुणे च उपदेशपदं निष्पद्यते। तत्र 'उपदेश'शब्दे घञ्प्रत्ययः कस्मिन्नर्थे भवतीत्यत्र विदुषामैकमत्यं न भवति। तत्र 'उपदेशेऽजनुनासिक इत्'[११] 'हलन्त्यम्'[१२] इत्यादिसूत्रेषु भाष्यादौ उपदेशपदमधिकृत्य बहुधा विचारः कृतो वर्तते। विद्वांसः भाष्याशयमेव गृहीत्वा स्वं स्वं मतं स्थापयन्ति।

तत्र भवान् भट्टोजिदीक्षितः 'उपदेशेऽजनुनासिक इत्'[१३] इत्यत्रोपदेशपदं करणघञन्तं स्वीकृत्य पश्चादत्र सूत्रे तस्य व्यर्थतामापाद्य उत्तरार्थमुपदेशग्रहणमिति

स्वीकरोति। तथाहि– ''उपदिश्यतेऽनेनेत्युपदेशः। 'कृत्यल्युटो बहुलम्'[१४] इति बाहुलकात् करणे घञ्। अन्यथा ल्युट् स्यात्। स च धातुपाठप्रातिपदिकपाठौ सूत्रवार्त्तिके च। तैर्हि शब्दा उपदिश्यन्ते। उपदेशे इति किम्? 'अभ्र आँ अपः' 'आङोऽनुनासिकश्छन्दसि'[१५] इत्यनुनासिकः। नाऽसौ शास्त्रे पठितः।''[१६] अनन्तरम् एवं स्वीकारे 'उञः ऊँ' इत्यत्रातिव्याप्तिदोषनिराकरणाय विधानसामर्थ्याश्रयणे 'अभ्र आँ अपः' इत्यत्रापि दोषाऽभावेन अत्रोपदेशपदस्य वैयर्थ्यमापादितम्। यद्यपि अनुबन्धा अनेकान्ता = अनवयवा इति पक्षे 'अभ्र आँ अटितः' इत्यादौ 'आदितश्च'[१७] इण्निषेधार्थम् इत्संज्ञाफलं भवितुमर्हति, तथापि 'आङ इत्' इत्येव वक्तव्ये अनुनासिकविधानं व्यर्थं भवति। अतः 'उपदेशेऽज्' इति सूत्रे यद्यपि निरर्थकमुपदेशपदं तथापि उत्तरार्थं 'हलन्त्यम्'[१८] इत्यत्रावश्यकमिति अत्रैव तद् गृहीतमिति दीक्षिताशयः।

श्रीभट्टोजिदीक्षितः 'हलन्त्यम्' इत्यस्यार्थं प्रतिपादयन् लिखति– उपदेशेऽन्त्यम् हलित् स्यात्। तत्र कः उपदेशपदार्थ इति जिज्ञासायाम् उक्तवान्– उपदेश आद्योच्चारणम्।[१९] आद्यञ्च तदुच्चारणम् आद्योच्चारणम्। 'उपदेश' इत्यस्याद्योच्चारणार्थकत्वं कैयटोऽपि 'एकाच उपदेशे'[२०] इति सूत्रे समर्थयति। तथाहि– 'इत्संज्ञाविधावुच्चारणवचनः उपदिशिर्गृह्यते।'[२१] इति। तत्र आद्यत्वं किं भवति? यदि पाणिनिकात्यायनपतञ्जलीनां यत् आद्यं = प्रथमम् उच्चारणं तदाद्योच्चारणम्। तर्हि यदा ते बाल्यावस्थायां सर्वप्रथमं यत् किमपि उच्चारितवन्तस्तदेव उपदेशपदवाच्यं स्यात् न तु धातुसूत्रादिकम्। यदि सूत्रादीनामुपदेशत्वमुच्यते तदा तु सूत्रादिनिर्माणात्पूर्वं तेषाम् आजन्ममौनित्वमापद्येत। तस्मात् अत्राद्यत्वं किमिति जिज्ञासा स्वाभाविकी स्यात्। अत्रोच्यते– आद्योच्चारणम् इत्यत्र 'आद्यत्वञ्च अज्ञातस्वस्वरूपबोधकत्वम्। उपस्याद्यर्थत्वाद्विशेरुच्चारणक्रियत्वात्।'[२२]। अज्ञातस्य स्वस्य रूपस्य बोधकत्वं, ज्ञापकत्वम् यत्रोच्चारणे तदेवोच्चारणमाद्योच्चारणं भवति। तदुक्तम्– 'आदेश उपदेशेऽशिति'[२३] इति सूत्रभाष्ये कैयटेन येषां स्वस्वरूपज्ञापनायापूर्वमुच्चारणं तेषामेवोपदेशव्यवहारः' इति। हरदत्तश्चापि आद्योच्चारणार्थरूपमुपदेशपदार्थं समर्थयति– अनिर्ज्ञातस्वरूपस्य स्वरूपज्ञापनार्थमाद्योच्चरणम् = उपदेशः।[२४] एवञ्च यत् अनुपूर्वीकमुच्चार्यते तदानुपूर्वीकमेव चेद् बुध्यते, तदा तदुच्चारणमाद्योच्चारणं भवति। तथाहि– 'अइउण्' इत्यादिसूत्रम्, 'सु औ जस्' इत्यादयः प्रत्ययाः, एधादयो धातवश्च तथाविधाः भवन्ति। अतः तेषामाद्योच्चारणरूपम् उपेदशत्वं भवति। न तु– 'अच्' 'हल्', 'टि' 'घु' प्रभृतीनाम्, तेषां स्वस्वरूपज्ञापकत्वाऽभावात्।

केषामाद्योच्चारणम् इति चेत्? पाणिनिकात्यायनपतञ्जलीनाम् इत्यायाति। पाणिनीयं व्याकरणं हि त्रिमुनिव्याकरणमित्युच्यते अत एतेषामेवाचार्याणां ग्रहणमिति भावः। पाणिनिकात्यायनपतञ्जलीनाम् आद्योच्चारणम् एव उपदेशपदार्थो भवति।

आद्योच्चारणम् एव उपदेशपदार्थः। अत एव भाष्ये– 'उपदेशेऽजनुनासिक इत्'[२५] इत्यत्र उपदेशग्रहणं किमर्थम्? 'अभ्र आँ अपः' इत्युक्तम्। अत्र हि 'आङोऽनुनासिकश्छन्दसि'[२६] इति सूत्रेण अनुनासिकशब्देन 'आँ' इत्यनुनासिकं विहितमतोऽत्र आद्योच्चारणं न भवति। अत एव इत्संज्ञा न भवतीतिभाष्याशयः। अत एव च 'इदमस्थमुः'[२७] इत्यत्र थमुघटकस्य मकारस्येत्संज्ञापरित्राणाय यः उकारः पाणिनिना कृतः स चरितार्थो भवति। आद्योच्चारणरूपोपदेशस्वीकाराभावे थमुघटकस्योकारस्येत्संज्ञानन्तरं 'थम्' इति शिष्यते, तत्र पुनः मकारस्य अन्त्यत्वात् हलन्त्यमितीत्संज्ञा स्यात्। तत्परित्राणार्थं पाणिनिना उकारः कृतः, उपदेशत्वं तु 'थमु' इत्यस्य भवति न 'थम्' इत्यस्येति प्राचामाशयो भवेत्।

काशिकावृत्तिकारः 'उपदिश्यतेऽनेनेति उपदेशः = शास्त्रवाक्यानि सूत्रपाठः, खिलपाठश्च'[२८] इत्युक्त्या करणे घञ्प्रत्ययं स्वीकरोति। 'अकर्तरि च कारके संज्ञायाम्'[२९] इत्यत्र चकारो भिन्नक्रमः तेन कुत्रचिदसंज्ञायामपि कर्तृभिन्ने कारके करणे घञ्–प्रत्ययः सिद्ध्यतीति काशिकाव्याख्यातृणां[३०] हरदत्तादीनामाशयः। भाष्येऽपि 'उपदिश्यतेऽनेनेति करणे घञ्'[३१] इत्युक्तम्। किन्तु श्रीदीक्षिताः करणे घञ्प्रत्ययं न स्वीकुर्वन्ति। एतेषां मतेन करणे घञ्प्रत्ययो न सम्भवति। करणे ल्युट्प्रत्ययेन घञ् बाध्यते।[३२] 'पुसि संज्ञायां घः प्रायेण'[३३] इति घप्रत्ययोऽपि न प्राप्नोति, तत्र संज्ञायामिति वर्तते। अत्र संज्ञात्वं न भवति। प्रायेण इत्यस्य सम्बन्धं संज्ञायाम् इत्यत्र कृत्वा क्वचिदसंज्ञायामपीति व्याख्यानं तु न समीचीनम्, यतोहि– प्रधानस्यैव विशेषणत्वं भवति, अत्र च घः (प्रत्ययः) प्रधानं भवति। अतः प्रायेण इत्यस्य 'घः' इत्यस्यैव विशेषणत्वं कल्पनीयम्, न तु असंज्ञायामित्यस्याप्रधानस्य। तदुक्तम्– महाभाष्ये[३४] 'नह्युपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणम्'। भाष्ये यत् बाहुलकात् करणे घञ् साधितं तन्न सम्भवति। यदि कोऽप्युपायो न भवेत्तदा अगतिकगतित्वात् तत् स्वीकार्यम्। अत्र तु भावे घञ्प्रत्ययस्वीकारेण कार्यनिर्वाहः सम्भवति। अतः अगतिकगतित्वाश्रयणं न युज्यते। किञ्च भाष्यकारः केवलं प्रौढ्या वार्तिककारन्यासखण्डनाय, करणे घञ्प्रत्ययं स्वीकृतवान्, न तु तात्त्विकतयेति दीक्षिताशयः।

श्रीनागेशदृष्ट्या उपदेशपदं भावघञन्तं नास्ति, तत् करणघञन्तं भवति। तस्यैव च 'हलन्त्यम्'[३५] इत्यत्रानुवृत्तिः स्वीक्रियते। अतः 'हलन्त्यम्' इत्यत्रापि करणघञन्तमेव उपदेशपदं भवति। भाष्यकारश्च करणे घञ्प्रत्ययं स्वीकरोति। उपदिश्यते अनेन स उपदेशः। 'कृत्यल्युटो बहुलम्'[३६] इत्यस्य स्थाने भाष्यकृता 'कृतो बहुलम्' इति न्यासेन सर्वेषां कृत्प्रत्ययानां बहुलतया विधानेन करणे घञ् साधितम्।[३७] तच्च शास्त्रं भवति। प्रयोगाणां शासनं=साधनं यैः भवति त एव

उपदेशपदवाच्या भवन्ति। त एव च व्यवसितपदार्थतया उच्यन्ते। व्यवसितत्वं नामधातुत्वादिना परिच्छिन्नत्वम्। एवञ्च धातुप्रातिपदिकप्रत्ययनिपातागमादेशा उपदेशपदवाच्या भवन्ति।

यद्यपि भाष्यकारः 'उपदेशेऽजनुनासिक इत्' इति सूत्रे शङ्कते- उपदेशग्रहणं किमर्थम्? उत्तरञ्च- 'अभ्र आँ अपः' इति। अर्थात् यदि 'उपदेशेऽज्' इति सूत्रे उपदेशग्रहणं न क्रियते तदा 'अभ्र आँ अपः' इत्यत्र 'आँ' इत्यस्य उद्देशस्यापि= अनुपदेशस्यापि अनुनासिकत्वेनाचः इत्संज्ञा स्यात्। उपदेशग्रहणे क्रियमाणे च अत्र इत्संज्ञा न भवति। भाष्यकारः उपदेशपदार्थं प्रतिपादयन् ब्रूते– 'प्रत्यक्षमाख्यानमुपदेशः गुणैः प्रापणमुद्देशः'[३८] इति। 'अभ्र आँ अपः' इत्यत्र 'आँ' इत्यस्य प्रत्यक्षमाख्यानं नास्ति। किन्तु अनुनासिकशब्देन आख्यानं वर्तते। एवञ्च 'उपदेश आद्योच्चारणम्' इत्याभाति। किन्तु यदि प्रत्यक्षमाख्यानमुपदेशः गुणैः प्रापणमुपद्देशः इत्येवं स्वीक्रियते तदा 'लृटः सद्वा'[३९] इति सूत्रेण (तौ सत् ३.२.१२७) सत्पदेन विहितयोः शतृशानच्प्रत्ययोः, 'निष्ठा'[४०] इति सूत्रेण (क्तक्तवतू निष्ठा, पा.सू. १.१.२६)निष्ठापदेन विहितयोः क्तक्तवतुप्रत्ययोश्च, इत्संज्ञा न स्यात् प्रत्यक्षाख्यानाऽभावात्, तेषामुपदेशत्वाऽभावात्। नह्यत्र शतृशानचक्तक्तवतूनां प्रत्यक्षमाख्यानं वर्तते। किन्तु गुणैः = संज्ञाद्वारकं प्रापणं= विधानमिति नोपदेशत्वमेतेषाम्। किञ्च 'राजसूयसूर्यमृषोद्यरूच्यकुप्यकृष्ट्यपच्याव्यथाः'[४१] 'चित्याग्निचित्ये च'[४२] इत्यादिसूत्रेण शब्दानां निपातनं भवति। तत्र निपातनानुमितक्याबादीनां प्रत्यक्षाख्यानाऽभावात् उपदेशत्वाऽभावेन क्याबादिघटकानां पकारादीनां 'हलन्त्यम्' इतीत्संज्ञा न स्यात्। अत उपदेशपदेन उद्देशस्यापि ग्रहणं वाच्यं, येन च समेषामिष्टस्थलानां सङ्ग्रहः स्यात्। एवञ्च उपदेशपदेन उद्देशस्यापि ग्रहणाऽत् 'अभ्र आँ अपः' इत्यादावुद्देशेऽपि इत्संज्ञा प्राप्नोति। एवञ्च 'उपदेशेऽजनुनासिक इत्'[४३] इति सूत्रे उपदेशपदे गृह्यमाणेऽपि दोषसद्भावात्, उपदेशशब्दस्य कोऽर्थः येन 'लृटः सद्वा' इत्यादिविहितशतृशानचादीनां सङ्ग्रहः 'अभ्र आँ अपः' इत्यस्य च व्यावृत्तिः स्यात् इति 'उपदेश इति किमर्थम्? 'अभ्र आँ अपः' इति भाष्याशयः। न तु आद्योच्चारणरूपोपदेशग्रहणसामर्थ्यात् 'अभ्र आँ अपः' इत्यत्र इत्वं न इत्येव भाष्याशय इति भावः।

यद्यपि 'अभ्र आँ अपः' इत्यत्र कार्याऽभावात् इत्संज्ञा न प्राप्नोति तथापि 'अभ्र आँ अटितः' इत्यत्र इत्संज्ञायां सत्यां 'आदितश्च'[४४] इति इट्प्रतिषेधः स्यात्। एवञ्च सदादिना विहितानां शतृशानचादीनां निपातानुमितक्यबादीनाञ्च उपदेशपदेन सङ्ग्रहार्थम् 'अभ्र आँ अटितः' इत्यादिव्यावृत्त्यर्थञ्च वार्तिककारेण– 'उपदेशेऽजनुनासिक इत्' इत्यस्य स्थाने 'उपदेशनेऽजनुनासिक इत्' इति न्यासान्तरः कल्पितः– 'सिद्धन्तूपदेशनेऽजनुनासिकवचनात्'[४५] इति। उपदिश्यतेऽनेनेति उपदेशनम्, 'कृत्यल्युटो

बहुलम्' इति बाहुलकात् करणे ल्युडिति वार्तिककृतामभिप्रायः। उपदेशनं नाम शास्त्रम्। अत्र शास्त्रपदं करणसाधनं वर्तते- पाणिनिः प्रयोगजातं शास्ति येनेति शास्त्रम्।[४६] शास्त्रपदेन प्रयोगशासनकरणभूताः 'धातुप्रातिपदिकप्रत्ययनिपातागमादेशाः' व्यवसितपदार्थत्वेन उक्ताः[४७] गृह्यन्ते। एवम्प्रकारेण 'उपदेशनेऽजनुनासिक इत्' इति न्यासेन सर्वेषामेव सदादिशब्दविहितानां शतृशानचादीनाम्, निपातानुमितानां क्यबादीनाञ्च उपदेशपदेन ग्रहणं भवति। भवत्येव हि प्रयोगसाधनकरणत्वं सर्वेषामेव। 'आँ' इत्यस्य तु प्रयोगसाधने करणत्वं न भवति। तेषां परिनिष्ठितत्वात्। तथा चानेन न्यासेन शतृशानचादीनां सङ्ग्रहः 'अभ्र आँ अपः' इत्यस्य च व्यावृत्तिः सिद्ध्यतीति वार्तिककृतामाशयः।

किन्तु भाष्यकारः-'सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तम्– 'इत्संज्ञायां सर्वप्रसङ्गोऽविशेषात्' इति। नैष दोषः। 'उपदेश' इति घञयं करणसाधनः।.....एवं तर्हि 'कृत्यल्युटो बहुलम्' इत्येवमत्र घञ् भविष्यति,[४८] इत्येवं प्रकारेण बाहुलकात् करणे घञ्प्रत्ययं कृत्वा 'उपदशने' इति वार्त्तिकं प्रत्यख्यातवान्। एवञ्च करणे एव घञ्प्रत्यय इति भाष्यकाराभिप्रायः। भाष्यकारो हि 'कृत्यल्युटो बहुलम्'[४९] इत्यत्र ''कृतो बहुलम्'' इति न्यासेन कृदन्तेऽपि सर्वत्र बाहुलकप्रवृत्तिं स्वीकरोति। अत बाहुलकात् उपदिश्यते अनेनेति करणे घञ् सेत्स्यतीति न्यासान्तरकल्पनाया आवश्यकता नास्तीति भावः।

यदि त्विदमुच्यते यत् भाष्यकारः वार्त्तिककारमतखण्डनाय एव करणे घञं स्वीकरोति न तु स्वसिद्धान्तस्थापनायेति। अत उपदेश इति भावघञन्त एवेति। तदा 'हलन्त्यम्' इति सूत्रेऽपि भावघञन्तस्य उपदेशपदस्यानुवृत्तिः स्यात्। तेन च 'भवतष्ठक्छसौ'[५०] इत्यनेन विहितठक्प्रत्ययककारस्य इत्संज्ञा न भविष्यतीति। 'हलन्त्यम्' इत्यनेन हि आद्योच्चारणरूपोपदेशान्तस्य इत्संज्ञा स्यात्। किन्तूपदेशावस्थायां 'ठक्छसौ' इत्युच्चार्यते तत्र च परस्य सत्त्वेन 'ठक'घटकस्य ककारस्यान्त्यत्वाऽभावात् इत्संज्ञा न प्राप्नोति। अतोऽत्र भावघञन्तोपदेशपदानुवृत्तौ दोषो भवति। यदि तु करणघञन्तस्य स्वीकारः तदा तु सर्वेषामपि प्रत्ययानाम् उपदेशत्वं भवत्येव। सर्वेषां ठक्छसादिप्रत्ययानां प्रयोगशासनकरणत्वात्।

यदि तु प्रत्ययत्वादिविशिष्टस्य समुदायस्य इत्युच्यते तदा तु अत्र उपदेशपदानुवृत्तिरेव व्यर्था भवति। अपि च अन्त्यपदसामर्थ्येनैव यत् किञ्चित् समुदायान्तग्रहणाऽभावात् प्रत्ययत्वादिविशिष्टस्यैव ग्रहणं प्राप्नोतीत्यतोऽपि- उपदेशपदं व्यर्थं भवति। किञ्च 'हलन्त्यम्' इत्यत्रोपदेशपदानुवृत्तिविरहादेव ''उपदेशेऽजनुनासिक इत्'' इति सूत्रे उपदेशपदग्रहणस्य प्रयोजनं 'हलन्त्यम्' इत्युत्तरार्थम् इति भाष्ये नोक्तम्, किन्तु 'अनुबन्धाः अनवयवाः' इत्यसिद्धान्तपक्षे 'अभ्र आँ अटित' इत्यत्र

उपदेशाऽभावेऽपि 'आँ' इत्यस्येत्संज्ञायाम् 'अटित' इत्यत्र इड्निषेधः स्यादिति इण्निषेधाऽभावरूपं फलमुक्तम्। यद्यत्र 'हलन्त्यम्' इति सूत्रेऽपि उपदेशपदानुवृत्तिः आवश्यकी स्यात्तर्हि असिद्धान्तपक्षे प्रयोजनकथनापेक्षया उत्तरार्थम् इत्येव कथं न मुक्तकण्ठेन भाष्यकारो वदेत्। तस्मादत्र उपदेशपदानुवृत्तिर्न भवतीत्यायाति, भवति चेत् करणघञन्तस्यैवेति श्रीनागेशाभिप्रायः।

अत्र एष विचारः पुनः प्रवर्तते यत् 'उपदेशेऽज्' इति सूत्रे यदि करणघञन्तमुपदेशपदं स्वीक्रियते तदा तस्यैवानुवर्तनम् 'हलन्त्यम्' इति सूत्रेऽपि स्यात्। करणघञन्तोपदेशपदग्रहणे तु प्रयोगशासनकरणभूतानां धातुप्रत्ययाद्यन्तानामेव हलामित्संज्ञा प्राप्नोति। न तु यस्य कस्यापि हलः। एवञ्च 'हलन्त्यम्' इति सूत्रे 'सिद्धं तु व्यवसितान्त्यत्वात्'[५१] इति वार्तिककारस्य प्रयासो व्यर्थो भवति। यतोहि करणघञन्तेन येषां प्रयोगशासनकरणभूतानां धात्वादीनां ग्रहणं भवति, तेषामेव व्यवसितपदार्थत्वेन ग्रहणं भवति। तदुक्तम्- 'के पुनर्व्यवसिताः? धातु-प्रतिपादिकप्रत्ययनिपातागमादेशाः'[५२] इति। एवञ्च करणघञन्तोपदेशपदेनैव सिद्धे वार्तिककारस्य कथनं विरुद्ध्यते।

अत्रोच्यते– वार्तिककारस्य प्रयासः व्यर्थो न भवति। यतः धात्वादीनां समुदायानां प्रयोगशासनकरणतया यथा उपदेशत्वं भवति तथैव तदवयवेष्वपि उपदेशकरणत्वं भवति। समुदायोपदेशेऽवयावानामप्युदेशो भवत्येव। एवञ्च उपदेशकरणतायाः धात्ववयवेष्वपि सत्त्वेन तदन्तस्यापि इत्संज्ञा प्राप्नोति। अतो धात्वाद्यवयवान्त्यस्यापीत्संज्ञालोपौ न स्याताम् इत्येतदर्थं 'व्यवसितान्त्यमिति वक्तव्यम्'[५३] इति वार्तिकस्य सार्थक्यम् भवति। तेन समुदायान्त्यस्यैव इत्संज्ञा भवति। तेषां समुदायविशिष्टानामेव व्यवसितपदार्थत्वादिति।

धातुत्वादिविशिष्टस्य व्यवसितपदार्थेन ग्रहणं भवतीत्युक्तम्। किन्त्वत्र भाष्यविरोधो दृश्यते। तथाहि- एकं सूत्रं भवति 'न धातुलोप आर्धधातुके'[५४] तेन हि धात्वंशलोपनिमित्तके आर्धधातुके परे गुणवृद्धी निषिध्येते। भाष्ये धातुग्रहणफलं 'लवितुम्, लविता, पवितुम्, पविता' इति दत्तम्। यत्र धात्वंशस्य लोपो भवति, तत्रैव गुणवृद्धिनिषेधः। अत्र तु पूर्वं ञकाररूपस्यानुबन्धस्य इत्संज्ञालोपाभ्यां निवृत्तिः। अनन्तरम् अवशिष्टस्य 'लू' 'पू' मात्रस्य धातुसंज्ञा भवति। अतो ञकारलोपवेलायां तत्र धातुत्वाऽभावात् धात्वंशलोपाभावेन गुणनिषेधो न भवति। लविता, पवितेत्यादि सिद्ध्यति। 'व्यवसितान्त्यम् इत्' इति स्वीकारे तादृशभाष्याशयो विरुद्ध्यते। यतोहि- धातुत्वादिविशिष्टस्य व्यवसितान्त्यस्य इत्संज्ञा भवति। अतो धातुसंज्ञां विना इत्संज्ञा न स्यात्। भाष्ये तु 'पूर्वं इत्संज्ञा, ततो धातुसंज्ञा' इत्यभिप्रेत्य– 'धातुग्रहणं किमर्थम्? इह माभूत्– 'लूञ्' लवितुम्, लविता। 'पूञ्' पवितुम्, पविता इत्युक्तम्।[५५] अतो

विरोध आपद्यत इति चेत् सत्यम्। धातुसंज्ञा तु क्रियावाचकस्यैव भवति, 'लू' इत्यादेरेव क्रियावाचकत्वम्। किन्तु अत्र व्यवसितपदार्थे धातुत्वादियोग्य'लू"पू'प्रभृति-घटितत्वेन अनुबन्धविशिष्टानां 'लूञ्' इत्यादीनां धातुत्वाभावेऽपि धातुग्रहणेन ग्रहणं भवति। यद्यपि 'लूञ्' इत्यत्रेदानीं 'लू' इत्यस्य न धातुत्वं ञकारेत्संज्ञायां सत्यां तु 'लू' इत्यस्य धातुसंज्ञा भविष्यति। अत्र लूञ्घटके लूशब्देऽपि धातुत्वयोग्यता वर्तते। अतो धातुत्वयोग्यलूप्रभृतिघटितत्वात् 'लूञ्' इत्यस्यापि धातुपदेन ग्रहणमिति भावः। अतो 'व्यवसितान्त्यमित्' इति स्वीकारे न कश्चन भाष्यविरोधः।

एतावता व्याख्यानेन इदमायातं यत्– 'उपदेशनेऽनुनासिक इति वक्तव्यम्'[५६] इति वार्त्तिकप्रत्याख्यानाय 'यथान्यासमेवास्तु– उपदेश इति घञयं करणसाधन'[५७] इति भाष्येण उपदेशपदम् आद्योच्चारणरूपं भावघञन्तं नास्ति, अपितु करणघञन्तं विद्यते। 'हलन्त्यम्' इत्यत्र च आद्योच्चारणार्थकोपदेशपदस्यानुवृत्तिर्नैव भवति। उपदेशशब्दस्य करणघञन्तस्वीकारादेव 'उदश्वित्' इत्याद्यव्युत्पन्नप्रातिपदिकान्तस्यापि हलः लोपः प्राप्नोति, यतः करणघञन्तपक्षे प्रातिपदिकस्यापि उपदेशत्वं सिद्ध्यति, तदर्थं 'प्रातिपदिकान्तानां प्रतिषेधो वाच्योऽकृत्तद्धितान्तानाम्'[५८] इति वार्त्तिककार उक्तवान्। कृदन्ततद्धितान्तभिन्नप्रातिपदिकानाम् इत्संज्ञा न भवति। किन्तु फलाभावान्नेत्संज्ञा इत्यादिना च वार्त्तिकस्य प्रत्याख्यानं कृतं भगवता भाष्यकारेण। यदि च आद्योच्चारणार्थकस्य (प्रत्यक्षाख्यानात्मकस्य) उपदेशपदस्य 'हलन्त्यम्' इति सूत्रेऽनुवृत्तिः स्यात्तदा तु 'प्रातिपदिकानां प्रतिषेध' इत्यादिवार्त्तिकस्य अनुत्थानमेव स्यात्। यतोहि-मुनित्रयेण न क्वचिदपि अव्युत्पन्नानि प्रातिपदिकानि उच्चारितानि सन्ति। 'उदश्वित्' इत्यत्रापि उदकेन श्वयते = वर्धते इति उदश्वित् 'तक्रम्' व्युत्पन्नमेव। अतः क्वापि तेषां प्रत्यक्षाख्यानं न भवति। 'उद्देशश्च प्रातिपदिकानां नोपदेशः' इति भाष्योक्तेश्च।[५९] तस्मात् भावघञन्तोपदेशस्य नात्रानुवृत्तिः। न च महाभाष्ये पस्पशाह्निके भाष्यकारेणोक्तम् 'अग्रहणप्रातिपदिकानामुपदेशः कर्त्तव्यः'[६०] अत्र प्रातिपदिकानामुपदेशः कर्त्तव्यः इत्युक्त्या प्रातिपदिकानाम् उपदेशोऽभवतीति वाच्यम्, उपदेशः कर्त्तव्यः इत्यस्य ग्रहणं कर्त्तव्यः इत्यर्थस्वीकारात्। सन्देहनिवृत्तये अनुवादरूपेण ग्रहणं कर्त्तव्यमित्यर्थः।

करणघञन्तोपदेशपदस्वीकारपक्षे एकः भाष्यविरोध आपतति। तथाहि 'तस्मिन्निति निर्दिष्टे पूर्वस्य'[६१] इत्यत्र भाष्ये षष्ठीप्रकल्पकत्वं तस्य इति पक्षे ('तस्मादित्युत्तरस्य' इति सूत्रं पञ्चम्यन्तात् परां षष्ठीं कल्पयति इति षष्ठी प्रकल्पपक्षाभिप्रायः) 'गुप्तिज्किद्भ्यः सन्'[६२] इत्यादावपि 'सन्' इति प्रथमान्तस्य षष्ठीप्रक्लृप्तिर्भवति। गुप्तिज्किद्भ्यः सनः (स्थाने) भवति इत्यर्थः स्यात्। किं स्यात् सनः स्थाने? स्थानि निर्देशाऽभावाच्च आन्तर्यतः सनः स्थाने सन् एव भविष्यति। तदनन्तरं भाष्यकारः 'इत्संज्ञा न प्रकल्पेत उपदेश इतीत्संज्ञोच्यते'[६३]

इत्युक्तवान्। अर्थात्- हलन्त्यमिति सूत्रेण उपदेशे विद्यमानस्य हलः इत्संज्ञा विधीयते। अत्र षष्ठीप्रकल्पकत्वपक्षे च सन् प्रत्ययः न साक्षादुच्चरितः साक्षादुच्चरितस्थाने जात आदेशरूपो भवति। अतोऽत्र उपदेशाऽभावात् नकारस्य इत्संज्ञा न स्यादिति इति भाष्याभिप्रायः।[६४] एतच्च ''उपदेशे उच्यमाना इत्संज्ञा न प्रकल्पेत'' इति भाष्यम्, आद्योच्चारणार्थकस्य भावघञन्तस्य उपदेशपदस्य स्वीकारपक्ष एव सङ्गच्छते। करणघञन्तस्वीकारे तु आदेशस्यापि उपदेशत्वं भवत्येव। अतः तत्रापि इत्संज्ञा भवत्येव। एवञ्च करणघञन्तोपदेशपदानुवृत्तौ भाष्यविरोधो भवतीति चेत्; अत्रोच्यते- 'उपदेशे उच्यमाना इत्संज्ञा न प्रकल्पेत' इत्यादिभाष्यं सिद्धान्तभाष्यं नास्ति। तद् भाष्यं तु एकदेश्युक्तिभाष्यं भवति। अत एकदेशिभाष्यबलेन भावघञन्तोपदेश-पदानुवृत्तिसाधकत्वं न युज्यते।

कथं तस्य भाष्यस्य एकदेशिभाष्यत्वम् इत्येतदर्थं तत्रत्यः प्रसङ्गोऽवलोकनीयो भवति। तथाहि- भाष्ये एष विचार आगतः यत्- यत्र 'इको यणचि' इत्यादौ सप्तम्यन्तम् 'अचि' इत्यादिपदं तत्र 'तस्मिन्निति निर्दिष्टे पूर्वस्य' [६५]इति सूत्रबलेन अव्यवहितस्य पूर्वस्य स्थाने कार्यं भवति। यत्र पञ्चम्यन्तम् 'उदः स्थास्तम्भोः पूर्वस्य'[६६] तत्र 'तस्मादित्युत्तरस्य'[६७] इति सूत्रबलेनाव्यवहितस्य उत्तरस्य स्थाने कार्यं भवति। यत्र तु 'ङमो ह्रस्वादचि ङमुण् नित्यम्'[६८] इत्यादौ सप्तमी पञ्चमी चेत्युभयं निर्दिश्यते तत्र पूर्वस्य कार्यं स्यात् परस्य वेति सन्देहे जाते सिद्धान्ती कथयति 'परत्वादनवकाशत्वाच्च' पञ्चमीनिर्देशो बलवान्। अर्थात् 'तस्मादित्युत्तरस्य'[६९] इति हि परशास्त्रं भवति, अतो विप्रतिषेधसूत्रबलेन परस्यैव कार्यम् भविष्यति। तदुक्तम् भाष्ये 'उभयनिर्देशे विप्रतिषेधात् पञ्चमीनिर्देशः'[७०] एवञ्च 'ङमो ह्रस्वादचि' इत्यादौ ह्रस्वादचो ङमुट् भवति।

एतदनन्तरं कश्चन एकदेशी- 'यथार्थं वा षष्ठीनिर्देशः'[७१] इति समाधानानन्तरमुक्तवान्। यथाविषयं प्रदेशेषु कार्यिणः षठ्यैव निर्देष्टव्येति कैयटः।[७२] अर्थात् तत्र तत्र सूत्रे एव षष्ठीनिर्देशः कर्तव्यः। 'ङमो ह्रस्वादचि'(पा.सू.८.३.३२) इत्यत्रैव 'अचि' इत्यस्य स्थाने 'ङमो ह्रस्वादचः' इति निर्देष्टव्यम्। यत्र यथावश्यकता तत्र तथा निर्देष्टव्यम्। किन्तु एतत् समीचीनम् न भवति- यतोहि 'इतोऽत् सर्वनामस्थाने'[७३] इहस्थस्य सप्तमीनिर्देशस्य उत्तरत्र 'गोतो णित्'[७४] (सर्वनामस्थानं णिद्वत्) अनावश्यकत्वेऽपि, पूर्वत्र = 'इतोऽत् सर्वनामस्थाने' इत्यत्रावश्यकत्वेन; तथैव 'ङमो ह्रस्वादचि'[७५] इत्यत्र सप्तमीनिर्देशस्यानावश्यकत्वेऽपि 'मय उञो वो वा'[७६] (अचि) इत्यादावावश्यकत्वेन उभयनिर्देशे गौरवग्रस्तं भवति। तदपेक्षया विभक्तिविपरिणामेनैव बोधे लाघवमिति 'यथार्थं वा षष्ठीनिर्देशः कर्तव्यः' इति पक्षो गौरवग्रस्तत्वादेकदेशिभाष्यं भवति।

अनन्तरं पुनः कश्चन अपर एकदेशी कथयति– 'तस्मिन्निति' 'तस्मादित्युत्तरस्य' (पा.सू.१.१.६६,६७) अत्र सूत्रद्वयेऽपि 'षष्ठी स्थानेयोगा'[७७] सूत्रात् 'षष्ठी' इत्यस्यानुवर्तनं कृत्वा षष्ठीप्रकल्पकत्वमाश्रितम्।[७८] एवञ्च उभाभ्यां परिभाषासूत्राभ्यामेव षष्ठी प्रकल्पनीया अनेनैकदेशिना पूर्वस्य एकदेशिनः 'यथार्थं वा षष्ठीनिर्देशः कर्तव्यः' इति पक्षः प्रत्याख्यातः। एतदपि कथनम् एकदेशिभाष्यमेव यतोहि– अत्र पक्षे षष्ठीपदानुवृत्तिर्भवति। किञ्च यत्रोभयोः निर्देशः तत्र परत्वानवकाशत्वयोराश्रयणम्। 'आद्गुणः'[७९] इत्यादौ आदचि इत्युभयोः पञ्चमीसप्तम्योः षष्ठीप्रकल्पनावारणाय 'एकः पूर्वपरयोः'[८०] इत्यत्र पूर्वपरग्रहणस्य ज्ञापकत्वं स्वीकरणीयम्। अन्यथा षष्ठीप्रकल्पितयोः उभयोः (अ+इ) स्थाने गुणे सिद्धे सूत्रं व्यर्थं स्यात् इति।

ततः अन्येन एकदेशिना षष्ठीप्रकल्पकत्वपक्षे 'गुप्तिज्किद्भ्यः सन्'[८१] इत्यत्र दोषोद्भावितः उपदेशाभावात् इत्संज्ञा न प्रकल्पेत इति। ततः पुनरपि प्रथमः एकदेशी– 'यथार्थं वा षष्ठीनिर्देशः कर्तव्यः' इति षष्ठीप्रक्लृप्तिवादी उक्तवान्– 'स्यादेष दोषो। यदीत्संज्ञा आदेशं प्रतीक्षेत। तत्र खलु कृतायामित्संज्ञायां लोपे च कृते आदेशो भविष्यति।'[८२] यदि आदेशानन्तरमेव इत्संज्ञा कर्त्तव्या तदा तु एष उपदेशाऽभावात् इत्संज्ञां न प्राप्नोति इत्येष दोषः कथञ्चित् स्यात्। 'गुप्तिज्किद्भ्यः सन्' इत्यत्र तु आदेशात् पूर्वमेव उपदेशोत्तरकालमेव सन्घटकस्य नस्य कृतायामित्संज्ञायां लोपे च कृते आदेशो भविष्यति।

एवम्प्रकारेण यदि षष्ठी प्रकल्पकत्वपक्षः एकदेशिभाष्यं भवति। तदाधारेण भावघञन्तोपदेशपदानुवृत्तिकल्पनं नोचितमिति भावः।

इदानीं यावदेतदायातं यत् उपदेशपदम् आद्योच्चारणमित्यर्थकं भावघञन्तं नास्ति। किन्तु करणघञन्तमेव व्यवसितपदाभिधेयम्। अत्र भाष्यान्तरस्यापि सम्मतिर्भवति। तथाहि– यथा पूर्वोक्तः एकदेशी अकथयत् यत्– 'कृतायामित्संज्ञायां लोपे च कृते आदेशो भविष्यति' इति। तदनन्तरं पुनः उपदेशपदस्य अनुवृत्तिम् अनभिप्रेत्यैव कथयति– 'अथवा नानुत्पन्ने सनि प्रक्लृप्त्या भवितव्यम्, यदा चोत्पन्नः सन् तदा कृतसामर्थ्या पञ्चमीति प्रक्लृप्तिर्न भविष्यति'[८३] इति। अयं भावः– प्रथमं सन्प्रत्ययः स्यात् तदनन्तरमेव तस्य स्थाने षष्ठ्याः प्रक्लृप्तिः स्यात्। यदि तु प्रथमं 'सन्' इत्येव नास्ति तदा तु कस्य स्थाने षष्ठी स्यात्। किञ्च यदा प्रकृत्यव्यवहितोत्तरत्वविशिष्टः सन् उत्पद्यते तदा पञ्चमी विभक्तिः प्रकृत्यव्यवहितोत्तरत्वविशिष्टं सन्प्रत्ययमुत्पाद्य कृतसामर्थ्या भवति। अतः तस्या षष्ठीप्रकल्पकत्वं न भवति। एवञ्च 'गुप्तिज्किद्भ्यः'[८४] इत्यादौ षष्ठीप्रकल्पकत्वमेव नायातीति तत्पक्षे प्रदत्तदोषनिराशाय उपदेशे उच्यमाना इत्संज्ञा न स्यादित्यस्य सार्थक्याय भावघञन्तोपदेशपदानुवृत्तिर्विफलेति भावः।

इदमत्र विचार्यते 'हलन्त्यम्'[८५] इत्यत्र उपदेशपदं भावघञन्तं तु नानुवर्तते। किन्तु करणघञन्तस्य उपदेशपदस्यानुवृत्तिरत्र भवति न वेति? अत्र करणघञन्तोपदेशपदमनुवर्तते इत्येव सम्प्रदायः। किन्तु केचन स्वीकुर्वन्ति यत् अत्र करणघञन्तस्याप्युपदेशपदस्य अनुवृत्तिर्नैव भवति। भाष्येऽनुवृत्तिकथनाऽभावात्। 'उपदेशेऽजनुनासिक इत्'[८६] इति सूत्रे भाष्यकारः उपदेश इति किमर्थम्? 'अभ्र आँ अपः' इत्यत्रेत्संज्ञामाशङ्क्य कार्याभावादित्संज्ञा न भविष्यति इत्युक्त्वा, 'इदमस्तीत्कार्यम्= 'अभ्र आँ अटितः' अनन्तरलक्षणायां सत्यामित्संज्ञायाम् 'आदितश्च' पा.सू.७.२.१६ इतीट् प्रतिषेधः प्रसज्येत'[८७] इत्यकथयत्। 'यदा अनेकान्ता अनुबन्धास्तदा अनन्तर इत्संज्ञकः कार्यस्य विशेषको भवतीति धातोरादित्वादिट्प्रतिषेधप्रसङ्गः'।[८८] एतेन आयाति यत् उपदेशग्रहणस्य 'हलन्त्यम्' (पा.सू.१.३.३) इत्यत्रानुवृत्तिः प्रयोजनं न भवति। अन्यथा भगवान् भाष्यकारः सर्वत्र विवरणशैल्या ब्रूते। अत्रापि कथयेत् 'उपदेशग्रहणमुत्तरार्थम्' इति। किन्तु तथा भाष्यकारः नावोचत्। भाष्यकारो हि केवलम् 'अनुबन्धा अनेकान्ताः' इत्यसिद्धान्तपक्षे 'अभ्र आँ अटितः' इत्यत्र इट्प्रतिषेधाऽभावरूपमेव फलं प्रतिपादयति। अतोऽत्र उपदेशपदं नानुवर्तते- इत्यायाति।

किञ्च 'हलन्त्यम्'[८९] इत्यत्र शङ्कितं 'हलन्त्ये सर्वप्रसङ्गः। सर्वस्य हल् इत्संज्ञा प्राप्नोति। किं कारणम्? सर्वोऽपि हल् तं तमवधिं प्रत्यन्तो भवति।' इत्युक्त्वा 'सिद्धं तु व्यवसितान्त्यत्वात्। व्यवसितान्त्यो हल् इत्संज्ञो भवतीति वक्तव्यम्। के पुनर्व्यवसिता? धातुप्रातिपदिकप्रत्ययनिपातागमादेशाः। सिद्ध्यति। सूत्रं तर्हि भिद्यते' इति। तदनन्तरञ्च 'यथान्यासमेवास्तु..... आहायं हलन्त्यमित्संज्ञं भवति इति सर्वश्च हल् तं तमवधिं प्रत्यन्तो भवति। तत्र प्रकर्षगतिर्विज्ञास्यते। 'साधीयो योऽन्त्य' इति कश्च साधीयः व्यवसितानां योऽन्त्यः'[९०] इत्युक्तम्।

एतेन प्रघट्टकेन भाष्यकारः अन्त्यग्रहणसामर्थ्यादेव व्यवसितपदबोध्यानां धातुप्रातिपदिकप्रत्ययनिपातागमानाम् अन्त्यहलामित्संज्ञा भवतीति 'हलन्त्यम्' इति सूत्रस्य अर्थो भवतीति मनुत इत्यायाति। यद्यत्रोपदेशग्रहणं स्यात् तदा भाष्यकारोऽवश्यमेव तथोच्चारयेदिति बोध्यम्।

'अग्निचित्' इत्यादौ तु- प्रातिपदिकानां प्रतिषेधो वाच्योऽकृत्तद्धितान्तानाम् इत्यनेन दोषाऽभावः। तत्र अकृत्तद्धितान्तानाम् इत्यत्र श्रूयमाणकृदन्ततद्धितान्त-भिन्नप्रातिपदिकानां इत्यर्थस्वीकारेण 'अग्निचित्' इत्यादौ प्रत्ययस्य सर्वापहारिलोपेन अश्रूयमाणकृदन्तत्वं प्रातिपदिकत्वञ्च भवति। अतोऽत्र अश्रूयमाणकृदन्तप्रातिपदिकत्वात् प्रतिषेधो भवत्येव।

'उपदेशेऽजनुनासिक इत्' इत्यत्रापि 'अभ्र आँ अपः' इत्यादौ विधानसामर्थ्यादेव इत्संज्ञा न प्रप्नोति। यथा 'उञः, ऊँ'[९१] इत्यत्र विधानसामर्थ्यादेव इत्संज्ञा न भवति।

एवमेव 'अभ्र आँ अटितः' इत्यत्रापि अनुनासिकविधानसामर्थ्यादेव नेत्संज्ञा भविष्यतीति उपदेशपदं विनापि न कोऽपि दोषः। तथापि एतादृशव्याख्याने बुद्धिकृतमतिगौरवं भवतीति उपदेशपदसार्थक्यं बोध्यम्। तथा च 'हलन्त्यम्' इत्यत्र करणघञन्तोपदेश-पदानुवृत्तिरेव वरम्। किञ्चोपदेशपदसत्वेऽबुधानां बालानामपि सुलभतया बोधो भवति।

करणघञन्तोपदेशपदस्वीकारेण अन्त्यग्रहणसामर्थ्येन वा व्यवसितपदार्थबोध्यानां धातुप्रातिपदिकप्रत्ययनिपातागमादेशानामन्त्यस्यैव हलः इत्संज्ञा 'हलन्त्यम्' इति सूत्रेण भवतीति स्थितम्। तत्र 'अइउण्'[९२] इत्यादिप्रत्याहारसूत्राणां तु तत्र परिगणनं नास्ति। अत एषां प्रत्याहारसूत्राणामन्त्यस्य हलः इत्संज्ञा कथं स्यादिति इति शङ्का तु नोचिता, यतः 'अइउण्' इत्यादीनां सूत्राणामपि क्रमबोधकत्वेन अर्थवत्वात् प्रातिपदिकत्वं भवति। एवमेव 'नमो वरिवश्चित्रङः'[९३] इत्यत्र पठितः चित्रङः प्रातिपदिकत्वम्। 'चो कुः' इत्यत्रापि चकारककारादेः प्रातिपदिकबोधकत्वात् प्रातिपदिकत्वम्। अत एषु इत्संज्ञा भवत्येव। 'घ्वसोरेद्धावभ्यासलोपश्च'[९४] इत्यत्र प्रश्लिष्टस्य शकारस्यापि स्वस्वरूपबोधकत्वेन प्रातिपदिकत्वं व्यवदेशिवद्भावेन च प्रातिपदिकान्त्यत्वमितीत्संज्ञा भवत्येव। 'घ्वसोः' इत्यत्र हि 'देहि' इत्यादौ सम्पूर्णाभ्यासलोपार्थं लोपश्च इत्यत्र एकः शकारः प्रश्लिष्यते, स च शकारः भिन्नपदम् इत्संज्ञकञ्च। द्विशकार-निर्देशोऽनुबन्धानामनेकान्तपक्षे भवति। सिद्धान्ते अवयवत्वपक्षे तु शकारो न कस्याप्यवयवो भवति। तत्र इत्संज्ञा न स्यात्। अतः तत्र पक्षे 'देहीत्यादौ' सर्वादेशतासिद्धये 'लोपो यि'[९५] इति सूत्रात् लोपग्रहणमनुवर्तते 'घ्वसो'रिति सूत्रे पुनर्लोपग्रहणं सर्वादेशार्थं बोध्यम्। 'थमु'घटकस्य 'थम्'इत्यस्य प्रत्ययत्वेन न परिच्छिन्नत्वम्। अत्र तु थमुः प्रत्ययो भवति, न तु थम् इति। अतो नात्र दोषः।

शेखरकारमतेन इत्संज्ञाविधौ करणघञन्तमेवोपदेशपदं स्वीक्रियते। यत्र तु नेत्संज्ञाविधिः तत्र भावघञन्तमुपदेशपदं स्वीकरणीयम्। श्रीकैयटेनापि 'एकाच उपदेशेऽनुदात्तात्'[९६] इति सूत्रे 'अत एव चेत्संज्ञायां करणसाधन उपदेशशब्दः शास्त्रवाच्याश्रितः' इत्युक्तम्।[९७] अतः 'उपदेशेऽच्' 'हलन्त्यम्' इति सूत्रद्वये करणघञन्तोपदेशपदम्। 'अथवेत्संज्ञाविधावुच्चारणवचन उपदिशिर्गृह्यते'[९८] इति भावसाधनपरकं कैयटव्याख्यानं नादर्तव्यम्। तथैव भावघञन्तवादी मनोरमाकारोऽपि नादर्तव्यः।[९९] 'एकाच उपदेशे'[१००] 'आदेच् उपदेशे'[१०१] इत्यादौ च भावसाधन एवेति। यतः नात्रेत्संज्ञाविधिः। उपदेशे यो धातुरेकाजनुदात्तश्च ततः परस्य वलाद्यार्धधातुकस्य इट् न स्यात्। उपदेशे य एजन्तधातु तस्यैच आत्वं भवतीति। 'उपदेशेऽत्वतः'[१०२] उपदेशे यो धातुरकारवान् इति गम्यते अतोऽत्रापि भावसाधन एव। कुत्रचित् कर्मणि प्रत्ययेन उपदिश्यमानपदार्थवाच्यपि उपदेशशब्दः। तथाहि— 'यदा तु कर्मसाधनः उपदिश्यमानार्थवाची षष्ठ्यर्थे च सप्तमी तदा उपदेशस्यैचा

विशेषणात्तदन्तविधौ सत्ययं पक्षो भवति– 'एज् य उपदेश इति।'[१०३] उपदिश्यते यः सः कर्मव्युत्पत्त्या आवागमादीनामुपदेशत्वम्।[१०४] इति।

उपर्युक्तविवेचनेन कुत्रचित् करणघञन्त उपदेशशब्दः, कुत्रचित् भावघञन्तः नागेशादिदिशा स्वीक्रियते। यद्यपि विद्वांसः भावघञन्तं मनोरमोक्तं पक्षमपि समर्थयन्ति।[१०५] तथापि तत्रानेकक्लिष्टकल्पनापेक्षया इत्संज्ञाविधौ करणघञन्त उपदेशशब्द एव स्वीकरणीयमित्यलं विस्तरेण।

संक्षिप्ताक्षरविवरणम्

संक्षिप्ताक्षराणि	संक्षिप्ताक्षरार्थाः
पञ्च.मित्र.–	पञ्चतन्त्रम्, मित्रभेदः
उद्ध.श.क.द्रु.	उद्धृतम् शब्दकल्पद्रुमः
मनु.	मनुस्मृतिः
कुमारसं	कुमारसम्भवम्
पा.सू.	पाणिनीयं सूत्रम्
श.कौ.	शब्दकौस्तुभः
वै.सि.कौ.	वैयाकरणसिद्धान्तकौमुदी
म.भा.प्र.टीका	महाभाष्यम्, प्रदीपटीका
ल.श.शे. सं.प्र.	लघुशब्देन्दुशेखरः, संज्ञाप्रकरणम्
का.पदम.	काशिकावृत्तिपदमञ्जरीटीका
का.वृ.	काशिकावृत्तिः
प्रौ.म.सं.प्र.	प्रौढमनोरमा,संज्ञाप्रकणम्
म.भा.	महाभाष्यम्
म.भा.का.वा.	महाभाष्यकात्यायनवार्त्तिकम्
ल.श.शे.दीपि.टीका.	लघुशब्देन्दुशेखरदीपिकाटीका
मा.भा.पस्पश	महाभाष्यं पस्पशाह्निकम्
ल.श.शे. नागेशोक्तिप्र. टीका.	लघुशब्देन्दुशेखरः नागेशोक्तिप्रकाशटीका
प्रौ.म.सं.प्र.रत्नप्रभा. टिप्पणी	प्रौढमनोरमा, संज्ञाप्रकणम् रत्नप्रभाटिप्पणम्
मा.सू.	माहेश्वरसूत्रम्

उद्धृतग्रन्थविवरणम्

१. पञ्चतन्त्रम् (मित्रभेदः), चौखम्बा विद्याभवन, वाराणसी, सन् १९९४

२. शब्दकल्पद्रुमः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, सन् २००२

३. मनुस्मृतिः, जे. पी. पब्लिशिंग हाउस, दिल्ली, सन् २००४

४. कुमारसम्भवम्, नागपब्लिशर्स, नवदेहली, सन् २००२

५. अष्टाध्यायीसूत्रपाठः, भार्गवपुस्तकालयः, गायघाट, बनाारस, सन् १९५१

६. शब्दकौस्तुभः, चौखम्बासंस्कृतसिरीज आफिस, वाराणसी, सन् १९९१

७. वैयाकरणसिद्धान्तकौमुदी (तत्त्वबोधिनीटीकोपेता), मेहरचन्द लछमनदास, नई दिल्ली, सन् १९८५

८. महाभाष्यम् (प्रदीपोद्योतटीका), हरियाणासंस्कृतसंस्थानम्, गुरुकुल झज्जर (रोहतक) सन् १९६२

९. लघुशब्देन्दुशेखरः (राधिकाटीका), सुशीलप्रकाशन, चौक, पटना सिटी, सन् १९८८

१०. काशिकावृत्तिः (न्यासपदमञ्जरीटीकोपेता), सुधीप्रकाशन, वाराणसी सन् १९८३

११. प्रौढमनोरमा (भैरवी-लघुशब्दरत्न-रत्नप्रभाटिप्पण्युता), वाणी विलास प्रकाशन, वाराणसी, संवत २०३९

१२. लघुशब्देन्दुशेखरः (दीपिकाटीकोपेतः), कामेश्वरसिंहदरभङ्गासंस्कृतविश्व-विद्यालयः, दरभङ्गा, सन् १९८५

१३. लघुशब्देन्दुशेखरः (नागेशोक्तिप्रकाशटीकोपेतः), चौखम्बासंस्कृतसिरीज आफिस, वाराणसी, सन् १९९१

पादटिप्पणी

१. पञ्च.मित्र.४२०
२. पञ्च.मित्र.४२१
३. रामार्चनचन्द्रिका उद्धृ.श.क.द्रु.
४. मनु.८.२७२
५. कुमारसं १.३०
६. पा.सू.१.३.२
७. पा.सू.७.२.६२
८. पा.सू.६.१.४५
९. पा.सू.७.२.१०
१०. पा.सू.७.३.८६
११. पा.सू.१.३.२
१२. पा.सू.१.३.३
१३. पा.सू.१.३.२
१४. पा.सू.३.३.११३

१५. पा.सू.६.१.१२६
१६. श.कौ.१.३.२
१७. पा.सू.७.२.१६
१८. पा.सू.१.३.३
१९. वै.सि.कौ.हलन्त्यम्
२०. पा.सू.७.२.१०
२१. म.भा.प्र.टीका ७.२.१०
२२. ल.श.शे.सं.प्र.
२३. पा.सू.६.१.४५
२४. का.पदम.६.१.४५
२५. पा.सू.१.३.२
२६. पा.सू.६.१.१२६
२७. पा.सू.५.३.२४
२८. का.वृ.१.३.२
२९. पा.सू.३.३.१९
३०. का.पदम.१.३.२
३१. मा.भा.१.३.२
३२. प्रौ.म.सं.प्र.
३३. पा.सू.३.३.११८
३४. म.भा.१.३.२
३५. पा.सू.१.३.३
३६. पा.सू.३.३.११३
३७. 'कृतो बहुलम्' इति वक्तव्यं पदाहारकाद्यर्थम्। म.भा. ३.३.११३, कृत्यग्रहणमपनीय कृद्ग्रहणं व्यापकत्वात् कर्तव्यम्। तस्मिंश्च कृते ल्युड्ग्रहणं न कर्तव्यम्, तस्यापि कृतत्वात्। इति प्रदीपे।
३८. म.भा.१.३.२
३९. पा.सू.३.३.१४
४०. पा.सू.३.२.१०२
४१. पा.सू.३.१.१४
४२. पा.सू.३.१.१३२
४३. पा.सू.१.३.२
४४. पा.सू. ७.२.१६
४५. म.भा.१.३.२ का.वा.२
४६. शास्ति अनेनेति शास्त्रम् ल.श.सं.प्र.दीपिकाटीका
४७. के पुनर्व्यवसिताः? धातुप्रातिपदिकप्रत्ययनिपातागमादेशाः। म.भा.१.३.३
४८. म.भा.१.३.२
४९. पा.सू.३.३.११३
५०. पा.सू.४.२.११५

५१. म.भा.१.३.३का.वा.२
५२. म.भा.१.३.३३
५३. म.भा.१.३.३का.वा.– सिद्धं तु व्यवसितान्त्यत्वात्
५४. पा.सू.१.१.४
५५. म.भा.१.१.४
५६. सिद्धन्तूपदेशनेऽजनुनासिकवचनात्- म.भा.१.३.२ का.वा.२
५७. म.भा.१.३.२
५८. प्रातिपदिकप्रतिषेधोऽकृत्तद्धिते- म.भा.१.३.३का.वा.२
५९. 'उपदेश' इत्युच्यते, 'उद्देशश्च प्रातिपदिकानां नोपदेशः'- मा.भा.६.१.४५
६०. म.भा.पस्पश.– यानि तर्ह्यग्रहणानि प्रातिपदिकानि? एतेषामपि..... उपदेशः कर्त्तव्यः।
६१. पा.सू.१.१.६६
६२. पा.सू.३.१.२०७
६३. म.भा.१.१.६६,६७
६४. 'आदेशस्योपदेशाऽभावात् तस्येत्संज्ञा न सिध्यतीत्यर्थः'- म.भा.प्र.टीका १.१.६६
६५. पा.सू.१.१.६६
६६. पा.सू ८.४.६१
६७. पा.सू.१.१.६७
६८. पा.सू.८.३.३२
६९. पा.सू.१.१.६७
७०. म.भा.१.१.६६-६७का.वा.३
७१. म.भा.१.१.६६-६७का.वा.१४
७२. मा.भा.१.१.६६-६७ प्र.टी.
७३. पा.सू.७.१.८६
७४. पा.सू.७.१.९०
७५. पा.सू.८.३.३२
७६. पा.सू.८.३.३३
७७. पा.सू.१.१.४८
७८. तत्तर्हि षष्ठीग्रहणं कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम् 'षष्ठी स्थानेयोगा' इति। मा.भा.१.१.६६-६७
७९. पा.सू.६.१.८७
८०. पा.सू.६.१.८४
८१. पा.सू.३.१.१०५
८२. म.भा.१.१.६६-६७
८३. म.भा.१.१.६६-६७
८४. पा.सू.३.१.२०७
८५. पा.सू.१.३.३
८६. पा.सू.१.३.२
८७. म.भा.१.३.२

८८. म.भा.१.३.२–कैयटः
८९. पा.सू.१.३.३
९०. म.भा. १.३.३
९१. पा.सू.१.१.१७–१८
९२. मा.सू.१
९३. पा.सू.३.१.१९
९४. पा.सू.६.४.११९
९५. पा.सू.६.४.११८
९६. पा.सू.७.२.१०
९७. म.भा.प्र.टी.७.२.१०
९८. म.भा.प्र.टी.७.२.१०
९९. प्रौ. म. सं प्र.
१००. म.भा.७.२.१०
१०१. पा.सू. ६.१.४५
१०२. पा.सू. ७.२.६२
१०३. म.भा.प्र.टी. ६.१.४५
१०४. प्रक्रियाकौ. प्रसादटीका उद्धृ. प्रौ.म.सं.प्र.
१०५. क. 'अन्ये तु 'लृटः सद्वा'.....मनोरमोक्तं प्रौढिवादत्वं सम्यगेवेत्याहुः' ल.श. शे. नागेशोक्तिप्र.टीका पृ.६४
ख. 'अन्ये तु 'तौ सत्'..... नास्ति दोषलेश इति वदन्ति। प्रौ.म.सं.प्र. रत्नप्रभाटिप्पणी पृ. ३५